संस्कृतवार्ता:

28.08.2024

सायम् - 06:20

मुख्यवार्ता:

· केन्द्रीय मंत्रिमंडलेन द्वादश नूतनानि ग्रीनफील्ड औद्योगिक स्मार्ट सिटी इत्येतानि नगराणि अनुमोदितानि।

· प्रधानमंत्री-जन-धन-योजनायाः अद्य दशवर्षाणि पूरितानि। अस्याः योजनायाः अन्तर्गतं त्रिपञ्चाशत् कोटित : अधिकांशत: लाभार्थिनः लाभान्विताः जाताः ।

· अद्य जम्मू-कश्मीरे विधानसभा निर्वाचनस्य प्रथम चरणाय नामांकन-पत्रस्य निरीक्षणं प्रचलति ।

· भारतीय-पैरालम्पिक-क्रीडकानां चतुरशीति-सदस्यानां दलं अद्य पेरिसनगरे आयोक्ष्यमाणासु क्रीडासु पदकानि विजितुं तत्परं सज्जं च अस्ति ।

कैबिनेट – औद्योगिकविथि

देशस्य प्रौद्योगिकपरिदृश्यस्य परिवर्तनाय राष्ट्रिय औद्योगिकवीथीविकासकार्यक्रमस्य अन्तर्गतं द्वादश नूतनानि ग्रीनफील्ड औद्योगिक स्मार्ट सिटी इत्येतानी नगराणि अनुमोदितानी। नवदिल्ल्यां मन्त्रिमण्डलसभायाः अनन्तरं वार्ताहरान् सम्बोधयन् सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत् एतेषु औद्योगिकक्षेत्रेषु संयुक्तरूपेण अनुमानितनिवेशः द्वयधिक षड्शतोत्तर अष्टाविंशतिः सहस्र कोटिरूप्यकाणि भविष्यति। प्रधानमंत्री-जन-धन-योजनायाः

सर्वकारीय-प्रमुख-वित्तीय-समावेश-योजनायाः प्रधानमंत्री-जन-धन-योजनायाः च अद्य दशवर्षाणि पूरितानि। अस्याः योजनायाः अन्तर्गतं त्रिपञ्चाशत् कोटित : अधिकांशत: लाभार्थिनः लाभान्विताः जाताः । प्रधानमन्त्री नरेन्द्रमोदी सर्वेभ्यः लाभार्थिभ्यः अभिनन्दनं कृतवान्, ये योजनैषा सफलं कृतवन्तः तेभ्यः धन्यवादं च दत्तवान्। सामाजिकसञ्चालमाध्यमेन प्रधानमन्त्रिणा उक्तं यत्, आर्थिकसमावेशं वर्धयितुं, कोटिशः जनानाम्, विशेषतः महिलाभ्यः, युवभ्यः, वंचितवर्गस्य सदस्येभ्यः च सम्मानं प्रदानाय जनधनयोजना सर्वोपरि अभवत्।

केन्द्रीयवित्तमन्त्री निर्मलासीतारमणः प्रोक्तवती यत्, एषा योजना निर्धन-वर्गान् आर्थिकमुख्यधारायां समावेशनं करोति, वंचितवर्गस्य विकासे च महत्त्वपूर्णां भूमिकां निर्वहति।

## जम्मू-कश्मीर

अद्य जम्मू-कश्मीरे विधानसभा निर्वाचनस्य प्रथम चरणाय नामांकन-पत्रस्य निरीक्षणं प्रचलति ।

जम्मू-कश्मीरस्य विधानसभानिर्वाचनस्य प्रथमचरणाय नामांकनम् ह्यः सम्पन्नम्। अस्मिन् चरणे षड्जनपदानां चतुर्विंशतिः आसनेषु सितम्बरमासस्य अष्टादश - दिनांके मतदानं भविष्यति । प्रदेशे मतदानं सितम्बरमासस्य अवशिष्टयो: चरणद्वयोः कृते पञ्चविंशतिः दिनांके एवं अक्टुबरमासस्य प्रथमे दिनांके भविष्यति। निर्वाचनस्य परिणामा: अक्टुबरमासस्य चतुर्थे - दिनांके उद्घोषिता: भविष्यंति ।

## एनटीएफ-एमईईटी

सर्वोच्चन्यायालयेन सङ्गठितस्य राष्ट्रियकार्यदलस्य एन टी एफ इत्यस्य अद्य राज्यस्य मुख्यसचिवैः, आरक्षीमहानिदेशकैः च सह चिकित्सकानां सुरक्षायाः अल्पकालिकोपायानां विषये चर्चा कृता। सभायाः सहाध्यक्षता केन्द्रीयगृहसचिवेन स्वास्थ्यसचिवेन च आभासीयमाध्यमेन कृता। चिकित्सकानां सुरक्षा- संरक्षा, कार्यस्थितीनां अनुशंसा कर्तुं सर्वोच्चन्यायालयेन कार्यदलस्य स्थापना कृता अस्ति। ह्यः केन्द्रीयमन्त्रिमण्डलसचिवः नवदिल्ल्यां कार्यदलस्य प्रथमोपवेशनस्य अध्यक्षतां कृतवान् आसीत् । सभायां विविधविषयेषु सविस्तरम् चर्चा प्रतिपादिता कार्यदलस्य सदस्यैः स्वीयप्रस्ताव: अपि संस्थापित: ।

## भारी वर्षा:

भारत- ऋतुविभागेन गुजरातस्य अनेकेषु जनपदेषु आगामिषु अष्ट चत्वारिंशत् होरासु रक्तवार्णिकि सञ्चेतना प्रसारिता अस्ति, सौराष्ट्रे कच्छे च विभिन्नस्थानेषु अत्यन्तं प्रचण्डवृष्टिः भविष्यति। वडोदरा अहमदाबादं च समेत्य गुजरातस्य विभिन्नजनपदेषु अपि ऋतुविभागेन आकस्मिकजलाप्लवस्य समाह्वानस्य सञ्चेतना प्रसारिता अस्ति। राज्यस्य द्विशतम् अधिकं

स्थानेषु विगतासु चतुर्विंशतिः होरासु लघुतः अतिवृष्टिः अभवत् । प्रधानमन्त्रिणा नरेन्द्रमोदी गुजरातस्य मुख्यमन्त्रिणा भूपेन्द्रपटेलेन सह दूरभाष माध्यमेन वार्तालापं कृत्वा जलाप्लवस्य समाह्वानं निवारणाय केन्द्रात् सर्वविध सम्भवसहायतायाः आश्वासनं दत्तवान्। अस्माकं संवाददात्रा उक्तवान् यत् मुख्यतया वडोदरानगरे जलाप्लवग्रस्तमण्डले साहाय्योद्धार-कार्यक्रमाः प्रचलन्ति।

उत्तरप्रदेशे

उत्तरप्रदेशे उत्तररेलवे विभागेन अष्टानां रेलस्थानकानां नामानि परिवर्तितानी। सम्बन्धिताधिकारिभ्यः नामपरिवर्तनस्य अनुमोदनं प्राप्त्यानन्तरं तत्कालप्रभावेन लखनऊविभागस्य स्थानकेषु भवति। नूतनानि नामानि सन्ति - कासिमपुर हाल्ट् अधुना जयससिटी इति अस्ति, जैस इत्यस्य नाम परिवर्त्य गुरु गोरखनाथ धाम इति, मिसरौली इत्यस्य नाम परिवर्तनानन्तरं माँ कालिकन धाम इति, बानी इत्यस्य नाम स्वामी परमहंस इति, निहालगढस्य नामकरणं महाराजा बिजली पासी, अकबरगंज इत्यस्य नूतनं परिचयः अस्ति माँ अहोरवा भवानी धाम, वारिसगंज हाल्ट इत्यस्य नामकरणं अमर शहीद भाले सुल्तान इति, फुरसतगञ्जः अधुना तपेश्वरनाथ धाम अस्ति ।

विदेशमन्त्रालय/सारूपम्

विदेशमन्त्रालयेन उक्तं यत् कतरस्य अधिकारिभिः गुरुग्रन्थसाहबस्य द्वौ सारूपौ दोहानगरे भारतीयदूतावासाय समर्पितौ। अनुमोदनं विना धार्मिकप्रतिष्ठानस्य संचालनसम्बद्धे प्रकरणे भारतात् सरूपाः गृहीताः आसन्। मन्त्रालयेन विज्ञप्तौ कतरसर्वकाराय गुरुग्रन्थसाहबस्य सरूपसमर्पने धन्यवाद: प्रदत्त:। मन्त्रालयेन कतरदेशे अन्येषु वा देशेषु सर्वे भारतीयनागरिका: अपि समाहूता : यत् ते सर्वेषु विषयेषु स्थानीयविधिनां नियमानाञ्च अवधानेन पालनं कुर्यू:।

## महा-विरोधपूर्णमार्चः

मालवाननगरे छत्रपतिशिवाजीमहाराज्ञः प्रतिमायाः पतनस्य विरोधे महाविकास-अघाडी इत्यनेन दलेन हुतात्मावीरभटस्मारकतः मुम्बईनगरस्य गेटवे ऑफ इंडिया इति पर्यन्तं सितम्बरमासस्य प्रथमे दिनाङ्के प्रातः एकादश वादने पदयात्रायाः घोषणा कृता अस्ति। मुम्बईनगरे वार्ताहरसम्मेलने शिवसेनानेता उद्धवठाकरे इत्येषः उक्तवान् यत्-वायो: प्रतिमा पतिता इति वक्तव्यम् अस्वीकार्यम्। श्रीठाकरेः उक्तवान् यत् चतुर्विंशत्यधिक द्विसहस्र तम वर्षस्य लोकसभानिर्वाचनं दृष्ट्वा गतवर्षे शीघ्रतायां एषा प्रतिमा स्थापिता। शरदपवारः सर्वकारस्य आलोचनां कृतवान् यत् एषा घटना तस्य निरीक्षणे भ्रष्टाचारं प्रतिबिम्बयति इति। काङ्ग्रेसनेत्रा नाना पटोले इत्यनेन अपि उक्तं यत् द्वितीयदिनात् सितम्बरमासस्य आरभ्य सर्वेषु ग्रामेषु विरोधः नैरन्तर्येन भविष्यति।

## भारतीय-पैरा-एथिलीट्-पेरिसनगरम्

भारतीय-पैरालम्पिक-क्रीडकानां चतुरशीति-सदस्यानां दलं अद्य पेरिसनगरे आयोक्ष्यमाणासु क्रीडासु पदकानि विजितुं तत्परं सज्जं च अस्ति । अद्यपर्यन्तं पैरालम्पिक-क्रीडायां प्रेषितम् इदं भारतस्य बृहत्तमं दलम् अस्ति । एकविंशत्यधिक-द्विसहस्रतमे वर्षे टोक्यो-पैरालिम्पिक-क्रीडायां भारतं पञ्च सुवर्ण-पदकानि समेत्य नव-दश पदकानि प्राप्य समग्र-श्रेणीषु चतुर्विंशति-तमं स्थानम् अवाप्नोत्।

।। इति वार्ताः।।